# Shri Sharada Stavah 3

# શ્રીશારદાસ્તવઃ ૩

## Document Information

Text title : shAradAstavaH 3

File name : shAradAstavaH3.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, sarasvatI

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Shri Sharada Stavah 3

# શ્રીશારદાસ્તવઃ ૩

(શિષ્યાશીર્વચનાત્મકસ્તવાઃ)
શ્રીરામલક્ષ્મણાવિવ સૌહાર્દં પ્રાપ્ય સુસ્થિરં સુચિરમ્ ।
શ્રીચામરાજપુત્રૌ જીયાસ્તાં શારદામ્બ તવ કૃપયા ॥ ૧॥

ભારતિ સમ્પદ્ભરિતૌ બુદ્ધ્યા ચૈવાતિતીક્ષ્ણયા પૂર્ણૌ ।
આયુષ્મન્તૌ સુખિનૌ ભૂયાસ્તાં ચામરાજસુકુમારૌ ॥ ૨॥

રાજ્યાભિવૃદ્ધિમતુલાં પ્રાપય્યાશ્વેભપત્તિવૃદ્ધિં ચ ।
પાલય કમલજજાયે ચામક્ષિતિપાલવર્યસુકુમારૌ ॥ ૩॥

ગજતુરગવાહનસ્થાવપિ રથમધ્યેષુ સુસ્થિતૌ વાણિ ।
સંરક્ષ સન્તતં બહુકરુણે શ્રીચામરાજસુકુમારૌ ॥ ૪॥

દેવદ્વિજગુરુભક્તિં સુદૃઢાં દત્ત્વા ચ વિનયસમ્પત્તિમ્ ।
પાલય પદ્મજમાનિનિ સતતં શ્રીચામરાજસુકુમારૌ ॥ ૫॥

ગિરિસાનુષુ ગહનેષ્વપિ માર્ગેષ્વનિશં સમસ્તદેશેષુ ।
સર્વાપદ્ભ્યઃ પાલય વિધિભામિનિ ચામરાજસુકુમારૌ ॥ ૬॥

વાક્પાટવમતિદૃઢતાં નીરોગત્વં ચ વપુષિ સુયશશ્ચ ।
દત્ત્વાબ્જયોનિજાયે કારુણ્યાત્પાહિ ચામનૃપપુત્રૌ ॥ ૭॥

વશ્યાન્વિધાય નૃપતીન્દત્ત્વા ચૈકાતપત્રસામ્રાજ્યમ્ ।
શ્રીચક્રકૃતનિવાસે વાણ્યવ ચામાવનીપસુકુમારૌ ॥ ૮॥

શ્રીનાથમુખનિષેવ્યે શ્રીવિદ્યાદાનદક્ષપદવિનુતે ।
શ્રીશારદામ્બ પાહિ શ્રીમન્તૌ ચામરાજસુકુમારૌ ॥ ૯॥

વાણિ તાવકવિલાસસમુત્થૌ પાણિનિર્જિતપયોરુહગર્વૌ ।
સામવેદનુતદિવ્યચરિત્રે ચામભૂપતનયૌ પરિપાહિ ॥ ૧૦॥

યદ્યસ્તિ મયિ કૃપા તવ વિનુતા સ્તુત્યાનયા ગિરાં દેવિ ।

શિષ્યાવિમૌ મદીયૌ પાહિ શ્રીચામરાજસુકુમારૌ ॥ ૧૧॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શારદાસ્તવઃ (૩) સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

*Shri Sharada Stavah 3*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*